**कुमुदाभिख्य** न० कुमुदस्येवाभिख्या शोभा यस्य श्वेतत्वात्। रौप्ये रजते धातौ शब्दचि० [ २कुमुदाधारस्थाने च

**कुमुदावास** पु० कुमुदानामावासः। १कुमुदप्राये देशे हेमच०

**कुमुदिका** स्त्री कौ मोदते मुद–हर्षे क ७त०। कट्फले अमरः

**कुमुदिनी** स्त्री कुमुदानि सन्त्यत्र देशे पुष्क० इनि। १कुमुदयुक्तदेशे पुष्करिण्यादौ २कुमुदलतायां भरतः। "कुमुदिनीकुलकेलिकलालसः" भ्रमराष्टकम्। "पद्मिन्यां ये गुणाः प्रोक्ताः कुमुदिन्याञ्च ते स्मृताः। सा तु मूलादिसर्वाङ्गैः रक्ता समुदिता बुधैः" भावप्र०तद्गुणा उक्ताः। कुमुदानां समूहः खलादेराकृतिगणत्वात् इनि। ३कुमुदसमूहे च। "वीक्षन्तेऽन्यमितः स्फुटत्कुमुदिनीफुल्लोल्लसल्लोचनाः" पञ्चत०

**कुमुदिनीनायक** पु० ६त०। चन्द्रे तदुदये कुमुदसंघप्रकाशात्तस्य तथात्वं कुमुदिनीपत्यादयोऽप्यत्र पु०

**कुमुदेश** पु० ६त०। चन्द्रे कुमुदेश्वरादयोऽप्यत्र पु०

**कुमुद्वत्** त्रि० कुमुद+चतुरर्थ्यां ड्मतुप् मस्य वः इति मस्य वः। १कुमुदयुक्तदेशादौ "हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु" रघुः स्त्रियां ङीप्। साच २कुमुदलतायाम्। "ग्लपयति यथा शशाङ्कं कुमुद्वतीं न तथाहि दिवसः" शकु० "कुमुद्वती भानुमतीव भावम्" रघुः "वाप्यो वैदूर्य्यसोपानपद्मोत्पलकुमुद्वतीः" भा० ४। ८। ६४ कुमुदस्यास्ति मतुप्। ३कुप्रीतियुक्ते त्रि० स्त्रियां ङीप्। "प्रभातवाताहतिकम्पिताकृतिः कुमुद्वतीरेणुपिशङ्गविग्रहम्। निरास भृङ्गं कुपितेव पद्मिनी न मानिनीसंसहतेऽन्यसङ्गमम्" भट्टिः मानिनीपक्षे कुमुद्युक्तस्त्रीपरत्वम्। ४कुमुदनागस्य भगिन्यां "इमां स्वसारञ्च यवीयसीं मे कुमुद्वतीं नार्हसि नानुमन्तुम्। इत्युपक्रमे "संयोजयां विधिवदास समेतबन्धुःकन्यामयेन कुमुदः कुलभूषणेन"। "अतिथिं नाम काकुत्स्थात् पुत्रमाप कुमुद्वती" रघुः

**कुमुद्वतीश** पु०६त०। चन्द्रे कुमुद्वतीनाथतदीशादयोऽप्यत्र पु०

**कुमुद्वतीवीज** न० ६त०। (वेरा) इतिख्याते कुमुदिनीवीजे "भवेत् कुमुद्वतीवीजं स्वादु रूक्षहिमं गुरु"भावप्र०

**कुमोदक** पु० मोदयति मुद–णिच्–ण्वुल् ६त०। १विष्णौ हेमच० सहि लाघवेन भारावतारणेन च पृथिव्या मोदक इति तस्य तथात्वम्। तस्येदमण् ङीप्। कौमोदकी तद्गदायाम् स्त्री

**कुम्ब** त्रि० कुवि–अच्। बाङ्गकुण्डे (कोपा) जटा० "कुरीर मस्य शीर्षणि कुम्बं चाधिनिदध्मसि" अथ० ६,१३८,३

**कुम्बा** स्त्री कुबि–भावे अङ्। १सुगहनायामाहतौ दृढ़वेष्टने अमेध्यादिदृष्टिवारणाय वैदिके २वेष्टनभेदे च "तस्मिन्नुदीचीनकुम्बां शय्यां निदधाति" तैत्ति०। कुम्बयति आच्छादयति अच्। ३स्थूलशाटके स्त्री त्रिका०

**कुम्ब्या** स्त्री कुबि–यत्। एकार्थप्रतिपादके विध्यर्थवादात्मके वेदैकदेशब्राह्मणवाक्य भेदे माधवः। "तस्मादृचं वा यजुर्वा साम वा गाथां वा कुम्ब्यां वाऽभिव्याहारेद्व्रतस्याध्यायाव्यवच्छेदाय" शत० ब्रा० ११।५।७।१०।

**कुम्भ** पु०कुं भूमिं कुत्सितं वा उम्भति उन्भ–पूरणे अच् शक०। १घटे, २हृद्रोगभेदे, ३हस्तिशिरःस्थमांसपिण्डद्वये, 'तैः किं मत्तकरीन्द्रकुम्भकुहरे नारोपणीयाः कराः" प्रसन्नराघवम्। ४कुम्भकर्णस्य पुत्रे, ५वेश्यापतौ, मेदि० ६प्राणायामाङ्गे श्वासरोधके चेष्टाभेदे, 'दशद्रोणा भवेत् खारी कुम्भस्तु द्रोणविंशतिरित्युक्ते ७परिमाणभेदे "धान्यं दशभ्यः कुम्भेभ्योहरतोऽभ्यधिकं बधः" मनुः। ज्योतिषप्रसिद्धे मेषावधिके ८एकादशराशौ च। ९गुग्गुलौ, १०त्रिवृति च न०।

तत्रघटार्थककुम्भलक्षणमुक्तं हेमा० दा० परिभाषाप्र०" "विष्णुधर्म्मोत्तरे "हैमराजतताम्रा वा मृण्मया लक्षणान्विताः। यात्रोद्वाहप्रतिष्ठादौ कुम्भाः स्युरभिषेचने। पञ्चाशाङ्गुलवैपुल्या उत्सेधषोड़शाङ्गुलाः। द्वादशाङ्गुलकं मूलं मुखमष्टाङ्गुलं भवेत्"। "पञ्चाशाङ्गुलेति आशा दिशः, तास्र, दशसंख्यावाचकत्वेन ज्योतिःशास्त्रादौ प्रसिद्धाः पञ्च च आशाश्च पञ्चाशाः तावन्ति अङ्गुलानि वैपुल्यं येषां ते तथाभूताः। मध्यप्रदेशे तिर्य्यग्मानेन पञ्चदशाङ्गुला इत्यर्थः। अथवा बाह्यप्रदेशे बलयाकृतिना सूत्रेण नीयमाना मध्यस्थाने पञ्चाशदङ्गुला इत्यर्थः। अस्मिन् पक्षे पञ्चाशाङ्गुलेति छान्दसः प्रयोगः" हेमा०।

तान्त्रिकमानन्तु तन्त्रसा० गौतमीये 'हैमं रौप्यं तथा ताम्रं मार्त्तिकं वा स्वशक्तितः। वित्तशाठ्यं न कुर्वीत कृते निष्फलमाप्नुयात्। षट्त्रिंशदङ्गुलं कुम्भं विस्तारो न्नतिशालिनम्। षोड़शं द्वादशं वापि ततोन्यूनं न कारयेत्"।

प्राणायामाङ्गकुम्भकपरकुम्भप्रकारः विधा० पा० उक्तोयथा "कुम्भकः पूरकोरेचः प्राणायामस्त्रिलक्षणः।